CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीः ॥

अथ वाक्यसुधाप्रारम्भः ।

श्रीगणेशायनमः ॥ नमोरामायदेवायसाच्चिदानंदमूर्तये ॥ कृष्णायगुरवेव्यासशंकराचार्यमूर्तये ॥ १ ॥ नामरूपात्मविश्वाख्यपंको यल्लग्नईक्ष्यते ॥ तद्वाक्यसुधयाप्लाव्यनिष्पंकंतत्त्वमीक्ष्यताम् ॥ २ ॥ पदार्थबुद्धिवाक्यार्थज्ञानहेतुरितिस्थितः ॥ आदौपदार्थबुद्ध्यर्थःपरिच्छेदःप्रवर्तते ॥ ३ ॥ वाक्यंतत्त्वमसीत्यादिप्रत्यग्ब्रह्मैकबोधकम् ॥ त्वंपदार्थइहप्रत्यक्तत्पदार्थोमहेश्वरः ॥ ४ ॥

तत्रादौवाक्यसुधाख्यं प्रकरणमारभमाणोयं भगवान्भाष्यकारः त्वंपदार्थंव्युत्पादयति । रूपंदृश्यमित्यादिभिःपंचभिःश्लोकैः । तत्राद्योयंवस्तुसंग्रहश्लोकः—

रूपंदृश्यंलोचनंदृक्तद्दृश्यंद्रष्टमानसम् ॥
दृश्याधीवृत्तयःसाक्षीदृगेवनतुदृश्यते ।१।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रूपंनीलपीतादियत्प्रसिद्धंतद्दृश्यंद्रष्टृवृत्तिव्याप्यमित्येतदवि-
वादमित्यर्थः । कापुनः सादृश्ययारूपंव्याप्यते इत्यपेक्षाया
माह ॥ लोचनंदृगिति ॥ यल्लोचनंनेत्रेंद्रियं सादृगित्येतद
पिप्रसिद्धमेव नेत्रान्वयव्यतिरेकानुविधायित्वाद्रूपज्ञानस्ये
त्यर्थः । एतावतापुत्रआत्माजायात्मेत्याद्यतिप्राकृतात्मदृष्टि
र्बाह्यविषयामिनिविष्टप्रत्यविता । तेनैवदेहात्मबुद्धिरपिव्यु
दस्ता । देहस्यापिबाह्यविषयवदिंद्रियग्राह्यत्वात् । इदानी
मिंद्रियात्मदृष्टिंप्रसक्तांवारयति ॥ तद्दृश्यंद्रष्टृमानसमिति ।
तल्लोचनंरूपापेक्षयादृगितियदुक्तंतदपिदृश्यमेवनदृक् । यतस्त
स्यापिमानसंमनोंतःकरणंसवृत्तिकंद्रष्टृतत्सद्भावसाधकंवर्तते ।
सतिमनसिव्याप्रियमाणेलोचनस्यसद्भावप्रवृत्त्यादेरवगमादस
तिचतस्मिन्सुषुप्त्यादावनवगमादित्यर्थः । तर्हिमनएवप्रत्य
गात्मेति प्राप्तां दृष्टिं वारयति । दृश्या धीवृत्तय इत्युत्तरा
र्द्धेन । प्रागुक्तमंतःकरणंतद्वृत्तयश्च धीवृत्तिशब्देनोच्यंते ।
ताश्चदृश्यविषयाएव तासांसाक्षीचिदात्मादृक्द्रष्टाप्रकाश

१ दूरीकृता । २ दूरीकृता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कः । ममनोन्यत्रगतमित्यनुभवादन्यत्रमनाअभूवंनादश मित्यादिश्रुतेश्च । सिद्धमनसोपिदृष्टचंतराधीनसिद्धिकत्वं तस्ययोद्रष्टासाक्षीसदृगेव । एवकारव्यावृत्तावाह । नतुदृश्यत इति । तस्यापिदृश्यत्वेनिरुपपत्तिकानवस्थाप्रसंगात् अंत तोगत्वास्वतःसिद्धवस्त्वनभ्युपगमे जगदांध्यप्रसंगाच्चस्वप्रका- शतयापरानपेक्षस्वरूपासिद्धिपर्यंतमेव दृग्दृश्यपरंपरान्वेषणम तोदृगेवसाक्षीसनान्यदृश्यइत्यर्थः । एतदुक्तंभवति । ये नविनायस्यद्रष्टृतानसंगच्छतेतदेवैकमग्न्युष्णत्ववत्स्वरूपभूतं- प्रकाशेनरूपपर्यंतस्यसर्वस्यद्रष्टृनमनश्चक्षुषोः । तयोस्तुसाक्षि चैतन्यावेशादग्न्यावेशादिवोदकलोहादौ दग्धृत्वंद्रष्टृत्वमुपच र्यते । तस्मात्मनआदिविषयपर्यंतंदृश्यमेवेतिनिश्चित्यतेषुस र्वेषुद्रष्टृत्वेनानुगतंदृश्यविलक्षणं चिदेकरसंप्रत्यंचमात्मानमेव तेआत्मासर्वांतरइतिश्रुतिप्रकाशितंशुद्धमुद्धरेदिति॥ १ ॥ संग्रहे णोक्तंविवृण्वन्यत्दृश्यानांपरस्परव्यभिचारात्व्यभिचारिणां

---

१ अनूस्यूतम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चसर्वाधारदंडमालादिवत्क्वचित्कल्पितत्वनियमाद्द्रष्टृस्वरू-
पस्यसर्वदृश्येष्वन्वयाद्रज्जुखंडवत्तस्याकल्पितत्वव्यावृत्तेरित्य
न्वयव्यतिरेकालोचनतया द्रष्टुरद्वैतात्मनउपपादनप्रकारमाह।

नीलपीतस्थूलसूक्ष्महस्वदीर्घादिभेदतः ॥
नानाविधानिरूपाणिपश्यल्लोचनमेकधा ॥

आदिपदाद्वक्रवर्तुलत्वादिग्रहणम् । एवंनानाविधा
निपरस्परव्यभिचारीणिरूपाणिपश्यल्लोचनमेकधा नव्यभि
चारीत्यर्थः । नहि लोचनाद्बहिरुक्तरूपसत्त्वे प्रमाणम
स्तिलोचनालोचनदशायामेवतत्प्रतीतेरेवान्यदाचतदप्रतीतेः
नचप्रत्यभिज्ञयाप्राक्सत्त्वग्रहस्तस्याअन्यथोपपत्तेः।तथाहि ।
यथाशुक्तौरजतमारोपितंरजतमिदमिहास्तीतिचिरमचिरंवानु
भूय तद्बाधोदयात्प्रागेवाविषयांतराण्यालोच्यपुनः तस्यामेवशु
क्तौलोचनंप्रसारयन्नानिवृत्तचक्षुर्दोषस्तदिदंरजतरूपमितिप्र-
त्यभिजानातिकश्चित्पुमान्नहितत्रप्रत्यभिज्ञाप्रमाणतामश्नुते।
आरोपितस्यप्रातीतिकशरीरत्वात्।एवमेवाधिष्ठानतत्त्वनामस्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रूपत्वावधारणपर्यंतंदृष्टविशेषस्यबाधितत्वानवगमात्पूर्वदृष्टस्या दृश्यविषयभ्रांत्यंतरोदये प्रत्यभिज्ञाभ्रमइति ॥ नचैवं स तिबौद्धमतापत्तिर्दृश्यदर्शनयोः क्षणिकत्वानंगीकारान्नित्य स्याखंडस्यैकस्यसर्वभ्रमाधिष्ठानस्य सदात्मनश्चिदेकरसस्या भ्युपगमाच्चेतिनकाचनास्मन्मतेदोषकल्पनेत्यत्रयुक्तिरनुसंधे येति ॥ २ ॥

बहुभ्योदृश्येभ्यो द्रष्टृत्वेनोद्धृतस्यैकस्यलोचनस्यापिनाजस द्रष्टृत्वंतस्याप्येकरूपत्वव्यभिचारादित्यतो लोचनमपिदृश्य मेव तस्मात्तदपिस्वद्रष्टुर्मनसोबहिर्नास्तीति व्युत्पादयति—

आंध्यमांद्यपटुत्वेषु नेत्रधर्मेष्वनेकधा ॥ संकल्पयन्मनः श्रोत्रत्वगादौयोज्यता- मिति ॥ ३ ॥

यथाप्येकस्मिन्पुरुषेएकमेवनेत्रं तथापितन्नैकरूपंतस्यांध्य मांद्याद्यवस्थाभेदेनविकारित्वात्विकारिणश्चस्वविकारद्रष्टृत्वा योगादन्यदृश्यत्वमवश्यमायातंमृत्पिंडादिवत्तस्यापियोद्रष्टाता

---

१ निश्चयपर्यंतं, २ कल्पित०, ३ अंगीकारात्, ४ साक्षात्, ५ लोचनस्य।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दन्वेषणायामंतःकरणंतद्द्रष्टृत्वेनान्वेतीत्याह संकल्पयन्मन इति । आध्यमांद्यपटुत्वेषुनेत्रधर्मेषुसत्सुअंधोहंमंदोहंपटुनेत्रोहमितिचानेकधानेकप्रकारेणसंकल्पयत्सम्यक्कल्पयत्मनोन्तःकरणं तस्य व्यविचारिनेत्रावस्थास्वव्यभिचारितयाद्रष्टृत्वं सिद्धमिति योजानातिएकत्रानिर्णीतस्यशास्त्रार्थस्यपरत्रापीतिन्यायेनचक्षुष्युक्तंन्यायमितरेंद्रियेषुयोजयेदित्याह । श्रोत्रत्वगादौयोज्यतामितिरूपेषूक्तोन्यायः शब्दस्पर्शादौयोज्यः चक्षुष्युक्तश्चश्रोत्रत्वगादावित्यर्थः ॥ ३ ॥

इदानींचक्षुरादिवन्मनसोप्यन्यदृश्यत्वंसाधयति—

कामःसंकल्पसंदेहौश्रद्धाश्रद्धेधृतीतरे ॥
ह्रीर्धीर्भीरित्येवमादीन्भासयत्येकधा चितिः ॥ ४ ॥

एवमादीनित्यादिपदात्क्रोधलोभमोहादयोगृह्यंतेएवमनेकावस्थमनेकविधमंतःकरणं चितिर्भासयतिपश्यतिसात्वेकधाएकविधैवनतस्याअवस्थांतरंवाधर्मांतरंवासंभाव्यतेतत्रप्रमाणाभावादित्यर्थः ॥ ४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनआदिसर्वावस्थासाक्षिभूतायाश्चितेरविकारित्वं साधयं स्तस्याएकरूपत्वंसर्वावभासकतयासर्वत्राव्यभिचारित्वेनाद्वितीयत्वंचोपपादयति--

नोदेतिनास्तमेत्येषानवृद्धिंयातिनक्षयम् ॥
स्वयंतथाविधान्यानिभासयेत्साधनंविना

एषाचितिः सर्वसाक्षिभूततया सर्वानुगतापिनोदेतिन जायतेनास्तमेतिनविनश्यतिअभूतप्रादुर्भावोजन्मसतोऽसत्त्वप्राप्तिर्विनाश इत्येवंविधाद्यंतविकाररहितैषाचितिरित्युक्तं भवति । मध्यमानपि वृद्ध्यादीन्विकारानाद्यंतविकारनिराकरणादर्थतोनिरस्ताअपिप्रतिपत्तिसौकर्यायमुखतः प्रतिषेधयति न वृद्धिमित्यादिना । वृद्धिरुपचयः क्षयोऽपचयः सावयवंहिकुड्यादिअवयवोपचयाद्वर्द्धतेअपचयाच्चापक्षीयते चितेस्तु निरवयवत्वान्नतद्योगइत्यर्थः । विपारिणामस्य चावस्थांतरापत्तिरूपस्योक्तलक्षणवृद्धिक्षयाभावात्तन्निरसने नैव निराससिद्धिः । अस्तितालक्षणस्य च वि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारस्यकदाचित्कालावस्थितिरूपस्य जन्मविनाशासंभवा देवासंभवउक्तो वेदितव्यः । कुतएवमस्याः षड्भावविका रराहित्यमित्यत्रहेतुमाह । स्वयमिति । तथाविधानिउक्तवि कारवंति तानि चान्यानिचेति तथा भासयेत्प्रकाशयेत । किंभासनं भानोत्पादनं हंत तर्हि विकारित्वमवस्थांतरयोगा दित्यत आह । साधनं विनेत्यर्थः । तथाचाविकारितया सर्वविकारावस्थासाक्षित्वादस्याश्चितेर्नविकारयोगशंकेतिता त्पर्यार्थः ॥ ५ ॥

ननु तदेवंद्रष्टृदृश्यान्वयव्यतिरेकालोचनेनव्यभिचारि- भ्यो दृश्येभ्योमिथ्याभूतेभ्योऽव्यभिचारिद्रष्टासत्यआत्माअ- द्वितीयःसिद्धः। स च निर्विकारएवसः सर्वावभासकइत्युक्तं तन्नोपपद्यतेअवस्थात्रयवत्तयात्मनोनुभवादित्याशंक्यमैवं अ- वस्थात्रययोगितयावभासस्यसाभासबुद्ध्यध्यासनिबंधनत्वा- दध्यस्तस्यचमिथ्यात्वादित्यभिप्रेत्यसाक्षिसाक्ष्यान्वयव्यतिरे- काभ्यामसंगकूटस्थात्मतामात्मनः प्रतिपादयति। चिच्छाया- वेशतइत्यादिभिःसप्तश्लोकैः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चिच्छायावेशतोबुद्धौभानंधीस्तु द्विधा स्थिता॥एकाहंकृतिरन्या स्यादंतःकरण-रूपिणी ॥ ६ ॥

चिन्निर्विकल्पकंसर्वावभासकंज्ञानंप्रत्यगात्मस्वरूपंतस्य च्छाया आभासस्तस्यबुद्धावंतःकरणे आवेशःप्रवेशस्तस्मा-दावेशतोभानंविशेषतोभासनमात्मनोभवतीति शेषः । एतदु क्तं भवति। चिदात्मास्वरूपप्रकाशतयास्वयंसदाभासमानो-पिस्वतोनिर्विशेषत्वाद्विशेषतो नावभासते । तस्मिन्पुनरध्य-स्तमनाद्यनिर्वचनीयमज्ञानं यदाकर्मोद्भूतंवासनाविशेषं स-दंतःकरणाकारं जायतेतदातस्मिन्नवभासकतयानुगताश्चिदा-त्मा तप्तायःपिंडवदेवाग्निरयः पिंडाकृतिर्बुद्ध्याकारावेभा सते ॥ तत्रबुद्ध्याविशेषेणगृह्यमाणमात्मचैतन्यमाभासच्छा येति चोच्यते । तदाबुद्ध्यात्मनोरेकत्वावभासात्तेन विशेषे णसविशेषमात्माभाति । एतदुच्यते । चिच्छायावेशतो भा नमिति । यस्यां बुद्धावेवंभानमात्मनः साधीस्तु बुद्धिस्तु

१ अंतःकरणे,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्विधा द्विप्रकारेण स्थिता एकाहंकृतिरूपेण अहंकृतिरस्या एकविधेत्यर्थः । अन्या विधा अंतःकरणरूपिणी स्यान्मनोरूपिणी भवतीत्यर्थः । मनःसंकल्पविकल्पात्मकंवासनास्थानं चिदात्मनिकर्तृकरणभावमापन्नासतीबुद्धिर्विशेषव्यवहारप्रवर्तिकाभवतीत्यर्थः ॥ ६ ॥

तत्रचिज्जडयोर्बुद्ध्यात्मनोस्तादात्म्याध्याससमुक्तं दृष्टांतेन स्पष्टयति—

छायाहंकारयोरैक्यंतप्तायःपिंडवन्मतम् ॥
तदहंकारतादात्म्याद्देहश्चेतनतामियात् ७

पूर्वार्द्धमुक्तार्थम्। अयसोग्निव्याप्तत्वेनाग्नित्वापत्तिवदहंकारस्यात्मचैतन्यव्याप्तत्वेनास्मदर्थत्वंमतमित्यभिप्रायः । एतावतालिंगशरीराध्यासआत्मनिकर्तृत्वभोक्तृत्वव्यवहारप्रवृत्तिहेतुर्दर्शितः । इदानीमुक्तोपाधिं पुरस्कृत्यस्थूलशरीराध्यासमात्मनोदर्शयति तदहंकारेत्युत्तरार्द्धेन । देहोप्यस्मदर्थत्वोल्लेखयोग्यः संवृत्तइत्यर्थः ॥ ७ ॥

इदानीमुक्ताहंकारतादात्म्यं विषयभेदेनविभज्यव्युत्पादयति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहंकारस्यतादात्म्यंचिच्छायादेहसाक्षिभिः ॥ सहजंकर्मजंभ्रांतिजन्यंचत्रिविधंक्रमात् ॥ ८ ॥

अहंकारस्यचिच्छाययाचिदाभासेनयत्तादात्म्यंतत्सहजं उत्पत्तिविशिष्टं चिच्छायाग्रस्ततयैवाहंकारस्योत्पत्तेरित्यर्थः। देहेनसहाहंकारस्यतादात्म्यंकर्मजं प्राचीनधर्माधर्मजन्यंदेहयोगस्यतदधीनत्वादित्यर्थः । साक्षिणातुतादात्म्यंभ्रांतिजन्यंभ्रममात्रसिद्धमितिक्रमादहंकारस्यतादात्म्यंत्रिविधंभवतीत्यर्थः तथाचानुभवोहंजानामिअहंमनुष्यअहमस्मिभवामीतिचक्रमेणानुसंधेयः ॥ ८ ॥

इदानीमुक्ताहंकारतादात्म्यावभासानांक्रमेणनिवृत्तिहेतून्व्युत्पादयति—

संबंधिनोःसतोर्नास्तिनिवृत्तिःसहजस्यतु॥ कर्मक्षयात्प्रबोधाच्चनिववर्तेक्रमादुभे ॥९॥

संबंधिनोरहंकारचिच्छाययोः सतोर्विद्यमानदशायांतयोस्तादात्म्यनिवृत्तिर्नास्त्येवतुशब्दोऽवधारणार्थः । अहंका-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रोदयात्सिद्धस्याभासस्याहंकारनिवृत्त्यैव निवृत्तेः यथारा रावोदकनिमित्तोदयस्य सवितृप्रतिबिंबस्यशरावोदकनिवृत्त्या निवृत्तिस्तद्वदित्यर्थः । देहाहंकारतादात्म्यंकर्मक्षयाद्देहारंभकस्यकर्मणः क्षयाद्देहपातान्निवर्ततेसाक्ष्यतादात्म्यंयुगपदेवनिवर्त्ततइति ॥ ९ ॥

एवमात्माहंकाराध्यासभेदांस्तन्निवृत्तिहेतूंश्चव्युत्पाद्याधुनाहंकाराध्यासकृतएवात्मन्यवस्थात्रयावभासः संसारित्वंचेति व्युत्पादयितुमुपक्रमते अहंकारलयइत्यादिभिस्त्रिभिः—

अहंकारलयेसुप्तौभवेद्देहोप्यचेतनः॥ अहंकृतिविकारोत्थःस्वप्नःसर्वस्तुजागरः १०॥

सुप्तौसुषुप्त्यवस्थायामहंकारलयेहंकारेकारणैकतांप्राप्तेसतिदेहोपिस्थूलोचेतनः चेतनावियुक्तोभवेत्अपिशब्दोबाह्यघटादिदृष्टांतार्थः यथासदैवघटादयोऽचेतनाएवतथादेहोप्यचेतनएवसदाचैतन्यव्यभिचारित्वात् । चिच्छायाग्रस्ताहंकारव्याप्तिकृतंदेहेचैतन्यं तद्वियोगे वियुज्यते ॥ तदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुषुप्तः पुरुषोभवतीत्यर्थः । अहंकारलयोपाधिकमात्मनिसु षुप्त्यवस्थायोगमुक्ताहंकारस्थित्याधिकमेवात्मनोऽवस्थांतर-मपि न स्वत इत्याहाहंकृतिविकारोत्थ इति ॥ १० ॥

कथं सर्वःस्वप्नोजागरश्चसर्वोहंकारविकारोत्थइत्यपेक्षाया माह—

अंतःकरणवृत्तिस्तुचितिच्छायैक्यमागता
वासनाःकल्पयत्येवबोधेऽक्षैर्विषयान्बहि १५

चितिच्छायैक्यमागतांतःकरणवृत्तिरेवास्वप्नेवासनाःकल्प यति संचिनोति।यतएवैषाबोधेप्रबोधेऽक्षैरिंद्रियैर्बहिर्विषयान् कल्पयतीतियोजना । एतदुक्तंभवति।बाह्यार्थविषयानुभवज निताःसंस्काराःस्वप्नहेतवइतिस्थितिस्तत्रबाह्यार्थानुभवआ-गंतुकःप्रतिविषयंनात्मनोधर्मस्तस्यकूटस्थत्वात् नापिदेहेंद्रि-यमनसामूअचेतनत्वनिश्चयात्तेषामचेतनत्वंचाक्रियावत्त्वात् किंतुदेहेंद्रियमनआत्मनांमिथःसंबंधेसतिजायतेसजायमानो-विषयानुभवःकस्यधर्मइतिनज्ञायते । नचवाच्यंमिलितेष्वे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वप्रदर्शनादेषामेवायंधर्मइतिसंघातचेतनावादस्यशास्त्रकृद्भिर्नि
रस्तत्वात् नतु देहस्य रूपादिमत्त्वेन घटादिवदचेतनत्वनि
श्चयादिंद्रियाणांचभौतिकविषयकत्वेनभौतिकत्वावगमात्कर
णत्वेनकुठारादिवच्चैतन्याविषयित्वनिरासोपपत्तेर्मनसश्चधर्मि
ग्राहकप्रमाणेनकरणत्वसिद्धौतस्यापींद्रियवदचेतनत्वनिश्च-
यात्परिशेषादात्मनएवधर्मोविषयानुभवइति चेद् मैवं तस्यनि-
हंकारत्वश्रुतिविरोधेनपरिशेषाऽसिद्धेः अर्थप्रकाशोबुद्धिरिति
प्रकाशगुणत्वाभिमतस्यज्ञानस्यप्रदीपप्रकाशवत् स्वाश्रयद्रव्य
जन्मातिरेकेणाजन्मानुपपत्तिरिति युक्तिविरोधाच्चपरिशेषा
ऽसिद्धेः । तस्माद्विषयानुभवोविभ्रमएवसचसत्यानृतेमिथुनी
भावलक्षणं सत्यं चचिदात्मातत्सत्यंसआत्मेतिश्रुतेः अनृतं
तुमनआदिविकारगणोवाचारंभणंविकारोनामधेयमितिश्रुतेः
तथाचचिदात्मन्यध्यासनिष्पन्नाहंकारस्यचैतन्यच्छायाव्या
प्ततया साभासस्यविषयपर्यंतंजलूकावद्दीर्घोभावलक्षणाया-
वृत्तिःसाविषयानुभवइत्यागतं तादृश्याश्चवृत्तेराश्रयोहंकाराभेदे
नावभासमानश्चिदात्माप्रमातृत्वमनुभवन्जागरणाद्यवस्थावा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निवभवतिएवमहंकारविकाररूपोविषयानुभवः स्वाश्रयेसाभा साहंकारएववासनारूपेणविलीयते एवंसर्वजाग्रद्वासनाश्रयमं तःकरणंचित्तादिदोषोत्पन्नमदृष्टादिना समुद्बुद्धवासनासुस्व यमेवग्राह्यग्राहकरूपेणविवर्त्तमानं भवति यदातदातदधिष्ठा नतयातदनुगतश्चिदात्मास्वभावस्थावानिवभवति । अतोहं कारोपाधिनिबंधनमात्मनोवस्थात्रयंनस्वतइतिशुद्धएवात्मास देतिसर्वंसुस्थमिति ॥ ११ ॥

उपसंहरति—

मनोहंकृत्युपादानंलिंगमेकंजडात्मकम्॥
अवस्थात्रयमन्वेतिजायतेम्रियतेऽपिवा ॥

मनोहंकृतिभ्यामुपादीयतेइतिमनोहंकृत्युपादानंमनसावास-नाश्रयेणास्मीतिसंकल्पाहंकारेण चिदात्मभावमापन्नेनाभि मन्यमानंलिंगं तच्चसमष्टिहिरण्यगर्भात्मनाएकमाविद्यकंभू तसूक्ष्मविकारत्वात्जडात्मकं भौतिकमेव तच्चाहंकारिक मित्यर्थः। एवंविधं यत् लिंगं लिंगशरीरं तदवस्थात्रयमन्वे तिअनुवर्त्तते इति । जाग्रत्स्वप्नयोःकथमनुवर्त्ततेतदाह।जाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेभ्रियतेपि वाउद्भवाभिभवरूपेणान्वेति । यतो जायतेभ्रियते च सुप्तावित्यर्थः । वाशब्दाच्चतुर्थीवाकदाचित्मूर्च्छाख्यावस्थामन्वेतीत्यर्थः ॥ १२ ॥

तदेवंत्वंपदार्थःसर्वावस्थासाक्षित्वादवस्थातदाश्रयसंघातविलक्षणोऽविकारीकूटस्थोनित्यःप्रत्यगात्मेति निर्द्धारितः । इदानीं तत्पदार्थंशोधयितुमुपक्रमते—

शक्तिद्वयंहिमायायाविक्षेपावृतिरूपकम् ॥
विक्षेपशक्तिर्लिंगादिब्रह्मांडांतंजगत्सृजेत्।

अयमर्थः अस्ति तावत्प्रत्यभिज्ञादिप्रमाणसिद्धंभूतभौतिकंजगन्नामकार्यंतच्चकारणमंतरेणनसंभवतिकारणं चोपादानं निमित्तंचेतिद्विविधंतदुभयंश्रुतितोयुक्तितश्चविचार्यमाणंनपरमार्थं किंतु मायामयं यतो मायां तुप्रकृतिंविद्यान्मायिनंतु महेश्वरमितिपरमेश्वराधिष्ठितांमायांप्रकृतिशब्देननिर्दिशंती श्रुतिर्जगदुपादानंमायाऽपरपर्यायमनाद्यज्ञानमाह। तत्रैवोपक्रमेकिंकारणंब्रह्मेतिब्रह्मणोजगत्कारणत्वं किमुपादायेति विमृश्यकालस्वभावादिकारणतांमध्येप्रक्षिप्यतदासात्वमात्मा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्यनीशः सुखदुःखहेतोरित्यंतेनावधार्यते ध्यानयोगानुग
ताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामित्यात्मशक्तिजाभास-
मायामेवजगत्कारणंनिर्धारयतिअचेतनस्यकार्यंकरणंचवि
द्यतेपरास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचे-
तितामेवमायामीश्वरशक्तिं ब्रह्मणः सर्वकारकत्वनिर्वोढ्रीं
द्रढयति । तथातद्धेदतर्ह्यव्याकृतमासीत्तमआसीत्तमसा
गूढमग्रेऽप्रकेतमसद्धाइदमग्रआसीत्ततो वैसदजायतेत्येवमन्ये
पि श्रुतिवादाः मयाध्यक्षेणप्रकृतिः सूयतेसचराचरमि-
त्यादिस्मृतिवादाश्चात्रानुसन्धेयाः युक्तितोपिमायामयमे
वजगत् । यतः संघातारंभपरिणामपक्षानयुक्तिसहाः
तथाहिसंघातवादिभिः सर्वभावानांक्षणिकत्वांगीकारात ॥
क्षणिकानांचसहकारिसापेक्षतयातन्निरपेक्षतयावाकारणत्वा
नुपपत्तेः सहकारिप्रतीक्षयाभावास्थितौक्षणिकत्वाभ्युपग-
महानात् ॥ तदनपेक्ष्यजनकतायांसदाकार्योत्पादनप्रस-
गात नचपूर्वक्षणस्योपादानतयाकारणं तदनन्वितत्वाद-
न्वये वाक्षणिकत्वक्षतेः नापिनिमित्ततया क्षणिकयोरुपका

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्योपकारकभावानिरूपणात् तस्मान्नसंघातवादोयुक्तिसहः॥ तथारंभवादेपिअण्वोर्न्निरवयवत्वस्वीकारान्निरवयवयोश्चसं-योगायोगात्संयोगेयोगेवोपचयाभावादनुपचितस्योपादानका रणत्वायोगादश्लिष्टएवपरिणामवादोपिनयुक्तिसहः ॥ भव स्यपूर्वरूपस्थिते नष्टेनारूपांतरोदयासंभवाद्गुणत्रयात्मकस्य प्रधानस्यसाम्यावस्थायांस्थितायांनमहदाकारताविरोधात्॥ तस्यांचनष्टायांप्रधानरूपकारणनाशान्निराश्रयो महान्कथ-मुद्भवेत् । तदपि गुणत्रयस्य सत्त्वान्नोक्तदोषप्रसंग इति चेत् ॥ तत्रेदं वक्तव्यं तदाकिंगुणाअविकृताव-तैतेविकृतावेति । आद्येनतेमहतउपादानंभवेयुः स्वरूपाव-स्थाप्रच्युत्यभावात् द्वितीयेगुणावस्थानाशेनिरुपादान-स्यमहतोनोत्पादः एवमत्रोत्तरोत्तरंपूर्वपूर्वस्यनाशोस्थितौवा नोत्पत्तुमर्हतीति महतोहंकारोहंकारात्पंचतन्मात्राणि तेभ्यः पंचमहाभूतानीत्यादिप्रक्रियानचातुरींधत्तइति । किंचनका रणमविकृत्यकार्यस्योत्पादोदृष्टो विक्रियमाणंवानित्यमेवेति शून्यावशेषंजगदापद्येतेत्यास्तांविस्तारः । तथासृज्यम-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पिविचार्यमाणंनसत्तस्यसिद्धस्यानिष्पादविरोधात् । नाप्यस
त्तस्यनिष्पादासंभावात् । नहि लोहकारस्यकूटः समुत्पा
द्यतेत्यंतासद्वाखपुष्पमितिपरिशेषान्मायात्मकंकारणंमायामयं
चकार्यामेति तदेतदाह शक्तिद्वयं हीति मायायाः साभा
सायाः शक्तिद्वयंहिप्रसिद्धंसर्वजनेषु किं तत् । विक्षेपरू
पैकाशक्तिरावृतिरपरानाहंब्रह्ममनुष्योहमितिसर्वेषामनुभवइ
त्यर्थः । तत्र विक्षेपशक्तिद्वारकं मायाकार्यमाहविक्षेपे
तिलिंगसूक्ष्मशरीरंसप्तदशात्मकंतदादौप्रथमंयस्यब्रह्मांडंस्थू-
लशरीरंसमष्टिरूपमंतेयस्यतल्लिंगादिब्रह्मांडांतंचगत्सृजेद्विक्षे-
पशक्तिस्तत्प्रधानमज्ञानमित्यर्थः । तदुक्तमभियुक्तैः आ-
ककायविक्षिपति (?) संस्फुरदात्मरूपंजीवेश्वरत्वजगदा
कृतिभिर्मृषैव । अज्ञानमावरणविभ्रमशक्तियोगादात्मत्वमा
त्रविषयाश्रयताबलेनेति ॥ १३ ॥

यतोमायामयेसृष्टेरतो रज्जुवदधिष्ठानतया विवर्तमानं माया
सत्तास्फूर्तिप्रदत्वेनानुगतमात्रेणकूटस्थमपि ब्रह्मकारणमित्यु
च्यतेनपरमार्थतइत्येतदाह—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सृष्टिर्नामब्रह्मरूपेसच्चिदानंदवस्तुनि ।
अंबुफेनादिवत्सर्वंनामरूपप्रसारणम् १४॥

ब्रह्मरूपेअव्यावृत्तेऽनुगतेपूर्णचित्स्वरूपेसृष्टिर्नामरूपप्रसारणमित्यन्वयः नामवाचकः शब्दो रूपंवाच्याकारःवाच्यवाचकाकारस्यप्रसारणंप्रकटीकरणंपूर्वपूर्वभ्रांतिवासनयातथोल्लेख इत्यर्थः । तदेतज्जगदधिष्ठानभूतब्रह्मान्यत्वानन्यत्वाभ्यामनिर्वचनीयमेवनपरमार्थमित्यत्रदृष्टांतमाह अंबुफेनादिवत्सर्वमिति । सर्वमेतदंबुनिफेनादिवद्द्रष्टव्यंनह्यंबुनिदृश्यमानफेनाद्यंबुनोभिन्नंतेनविनानिरूप्यमाणस्यस्वरूपस्याभावात् पार्थिवाग्न्युपशामकत्वाच्च । नाप्यभिन्नमंबुनः पृथगुपलंभादद्रव्यात्मकत्वाच्च । नापिभिन्नाभिन्नंविरोधात् । एवंजगदपिनचिदात्मनोभिन्नंचिद्रूपाद्बहिःस्वातंत्र्येणानिरूपणात् । नाप्यभिन्नंपृथगुपलंभादेवामेंद्रियगोचरत्वाज्जडत्वात्स्थलत्वादनेकप्रकारत्वाच्चेति । सच्चिदानंदवस्तुनीति ब्रह्मणोविशेषणंतस्यस्वरूपनिर्देशपरंसदिति सदैकरूपत्वमागमापायिप्रपंचवैलक्षण्यमुच्यते ॥ चिदिति सनातनाप्लुतप्रका

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शात्मकत्वोक्त्याजडप्रपंचवैलक्षण्यमीर्यते आनंदमिति ॥ परमानंदरूपत्वकथनेनपरमपुरुषार्थरूपत्वद्योतनात्तुच्छदुः-खाकारप्रपंचविलक्षणतोक्तावस्तुशब्दोबाधाभावं लक्षयति । तेनदृष्टनष्टस्वरूपतयास्वप्नतुल्यजगद्वैलक्षण्यमुक्तंतथाचकार्य-कारणरूपेणवाच्यवाचकरूपेणोपकार्योपकारकरूपेणविभा-व्यमानप्रपंचविलक्षणस्यब्रह्मणः सृष्टत्वादिमायामयमेवे त्यर्थः ॥ १४ ॥

एवंमायाविक्षेपशक्तिनिबंधनं प्रपंचविभ्रममुपपाद्यावरणश क्तिप्रयुक्तंब्रह्मस्वरूपाविवेकलक्षणं संसारित्वमात्मनोदर्शयति

अंतर्दृग्दृश्ययोर्भेदंबहिश्चब्रह्मसर्गयोः॥या वृणोत्यपराशक्तिसासंसारस्यकारणम् १५

अंतःप्रतीचि अहमित्यस्मिन्नवभासे याशक्तिर्दृश आत्मनोदृश्याद्भेदं वैलक्षण्यं दृश्यस्यवादृग्विलक्षणत्वमावृ णोतितथाबहिश्चपरांचिविषयेब्रह्मणः परिपूर्णस्यसृज्यत इतिसर्गप्रपंचस्य मिथोभेदं विलक्षणस्वभावं सत्यज्ञानानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दैकरसस्यसमात्मत्वंतद्विपरीतरूपत्वं वावृणोति सापराद्वि
क्षेपरूपायाअन्यासंसारस्यप्रसिद्धस्यकारणस्वरूपास्फुरणा-
द्विपरीतरूपतामात्मनो मन्यमानः स्वप्नइव संसरतिलोक
ति प्रसिद्धत्वान्नात्रयुक्तानुसंधानेनकार्यमित्यभिप्रायः ।१५
सासंसारस्यकारणमित्युक्तंतत्रतयाशक्त्याकः संसरतीत्यपे
क्षायांसंसारिस्वरूपंविविच्यदर्शयन्संसारस्यमायामयत्वमाह-

साक्षिणःपुरतोभातिलिंगदेहेनसंयुतः॥चि
तिच्छायासमावेशाज्जीवःस्याद्व्यावहारिक

साक्षिणः सर्वांतरस्य प्रत्यगात्मनः पुरतोऽग्रेऽव्य
वधानेनयल्लिंगमहंकारप्रधानं प्राणांतःकरणलक्षणं देहेनस्थू
लेनसंयुतंभातितल्लिंगं चितिच्छायासमावेशाच्चैतन्याभा
व्याप्तत्वाद्व्यावहारिकोव्यवहारसिद्धोजीवः स्यात्कर्ताभो
क्ताहंमनुष्यःकाणोबधिरइत्येवंव्यवहर्ताभवतीत्यर्थः॥ १६ ॥
दृश्यस्यदृगात्मन्यध्यासनिबंधनं जीवत्वंव्यवहाराश्रयमुक्त्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बंधमोक्षयोर्वैयधिकरण्यशंकानिवृत्तयेचिदात्मनोऽनात्मन्य-
ध्यासनिबंधनंजीवत्वमाह—

अस्यजीवत्वमारोपात्साक्षिण्यपिचभासते
आवृतौतुविनष्टायांभेदजातंप्रयातितत् ॥

अस्य पूर्वोक्तलिंगस्य जीवत्वमारोपादध्यासात् । साक्षिण्यपिप्रत्यक्चिदात्यन्यपिचभासतेतथाच संघातविलक्षणः साक्ष्यपिसंघाततादात्म्याध्यासात्संसार्येव भासेत नपरमार्थतः कोपि संसारी जीवोऽस्तीत्यभिप्रायः । आत्माज्ञाननिबंधनमात्मनोबंधनमित्यत्रान्वयमुक्त्वाव्यतिरेकमाह । आवृताविति । आत्मतत्त्वावृतौअज्ञानरूपायांविनष्टायांतुतद्भेदजातंपूर्वोक्तलिंगंजीवः साक्षीत्येवंलक्षणविशेषजातं प्रयातिप्रकर्षेणगच्छतिबाधितंभवतीत्यर्थः ॥ १७ ॥

तदेवमन्वयव्यतिरेकाभ्यामावरणशक्तिप्रधानाज्ञाननिबंधनमात्मनः संसारित्वमुक्त्वाविक्षेपशक्तिप्रधानाज्ञाननिबंधनमेवब्रह्मणः सप्रपंचत्वमित्येतत्प्रपंचयति—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्गस्यब्रह्मणस्तद्वद्भेदमावृ-
त्यतिष्ठति ॥ याशक्तिस्तद्वशा
ब्रह्मविकृतत्वेनभासते ॥ १८ ॥

यथादृश्यस्यप्रत्यगदृश्येविवेकाच्छादिका आवरणश-
क्तिस्तद्वद्याशक्तिः विक्षेपात्मिकाब्रह्मणः परमात्मनः सका-
शात्सर्गस्यसृज्यप्रपंचस्यभेदंब्रह्मासंसर्गित्वलक्षणं विशेष-
मावृत्यतिष्ठतितद्वशात्तन्महिम्नाब्रह्मविकृतत्वेन सप्रपंचत्वे-
नभासते ॥ जगत्सृष्टिस्थितिप्रलयकारणंब्रह्म सर्वकर्मासर्व-
कामइत्यादौसप्रपंचमिवप्रतीयतइत्यर्थः ॥ १८ ॥ अन्वय-
मुक्त्वाव्यतिरेकमाह—

अत्राप्यावृतिनाशेनविभाति
ब्रह्मसर्गयोः ॥ भेदस्ततोविकारः
स्यात्सर्गेनब्रह्मणिक्वचित् ॥ १९ ॥

अत्रापि ब्रह्मण्यावृतिनाशे आवरणरूपाविद्याविनाशे
सतिब्रह्मसर्गयोः ब्रह्मप्रपंचयोर्भेदोविशेषोनविभाति इदं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मकारणमिदंजगत्कार्यमितियोविशेषः स्थितः सोविद्याविक्षेपरूपत्वादविद्यायांनिवृत्तायांनिवृत्तः पुनर्नाभासतेइत्यर्थः । यतएवमविद्यामायादिशब्दवाच्या ज्ञानकल्पितोविकारोऽतः कारणात्सर्गेसर्गनिमित्ते क्वचित्कदाचिदपिब्रह्मणि नाविकारःस्यान्नभवतीत्यर्थः ॥ १९ ॥

एतावताग्रंथसंदर्भेणसदैवासंगकूटस्थएवात्मासाक्षीत्वंपदार्थः। तथासदैवनिष्प्रपंचकूटस्थमेवब्रह्मतत्पदार्थः।उभयत्रभासमानोविशेषगुणोमायामयत्वात्कालत्रयेपिनपरमार्थ इतिनतत्कृतोविशेषः । कोप्यात्मवस्तुनिसंभाव्यतेइतिशोधितौ तत्त्वंपदार्थौ । इदानींतयोरेकत्ववाक्यार्थंकथयितुंतत्त्वंपदयोर्वाच्यार्थलक्ष्यार्थचक्रमेणश्लोकद्वयेनोपदिशति—

अस्तिभातिप्रियंरूपंनामचेत्यं
शपंचकम् ॥ आद्यंत्रयंब्रह्मरूपं
जगद्रूपंततोद्वयम् ॥ २० ॥

यथाबाह्येकस्मिन्देहे तद्वद्बाह्येघटेच अस्तीतिसत्तोल्लिख्यते भातीतिस्फुरता प्रियमित्यनुकूलवेदनीयतयासुखात्मता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथारूपमाकारविशेषः करचरणादिव्यूहलक्षणंपृथुबुध्नोदर
कारलक्षणंच नामशरीरंघटइतिचेत्येवंपंचकंयदस्तितत्रायंत्र
सत्तास्फुरताभातिचेतिब्रह्मरूपंप्रत्यग्ब्रह्मणः स्वरूपंपरमार्थ
ततःपुरस्ताद्यदुक्तंद्वयंनामरूपंचेतितज्जगद्रूपंमायामयमनृतंव
चारंभणत्वश्रवणादित्यर्थः । एतेनसर्वएवबाह्याभ्यंतराभा
वाव्याख्याताः । तथाचैतन्यंचैकमविविक्तंसत्तत्त्वंपदयोर्वा
च्यंभवतीतिसिद्धम् ॥ २० ॥

इदानींपदयोर्लक्ष्यार्थवाच्यार्थैकदेशमुद्धृत्योपदिशति—

खवाय्वग्निजलोर्वीषु देवतिर्य
ङ्नरादिषु ॥ अभिन्नात्साच्चिदा
नंदाद्भिद्येतेरूपनामनी ॥ २१ ॥

खादिषुपंचसुअधिभूतेषुदेवतिर्यगादिभेदभिन्नेष्वध्यात्मेषु
चअभिन्नादव्यावृतात्साच्चिदानंदादधिष्ठानरूपात्साक्षिणः रू
पनामनीप्रतिविषयंभिद्येतेतथाचसर्वपदार्थेष्वनुस्यूतं सच्चिदा
नंदात्मकंवस्तुतत्त्वंपदयोर्लक्ष्यमित्यर्थः । ननुकथंजगतिवि
भाव्यमानानांसत्तास्फूर्तानन्दानां प्रत्यग्ब्रह्मरूपत्वमिदमिति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राग्रूपेणेवप्रतीयमानत्वादितिचेत् । उच्यते । विचार्यमा
णेषुविषयेषुसत्तादेरसंभवएव । तथाहिसदिदमितिपराग्रूप
मुल्लिख्यते तत्रास्तीदमिति यद्गृह्यतेतदेवसमयांतरेऽसद्बुद्धि
गम्यंदृश्यतेनास्तीदमिहेति तथाचास्तित्वनास्तित्वयोरेकत्र
विरोधान्नसत्त्वमसत्त्वंवा विषयस्यनिश्चेतुं शक्यते कालभेदे-
नोभयधर्मोपपत्तेर्नदोष इति चेत्तर्हि शुक्तिरजतस्यापिसत्त्वा
सत्त्वेपरमार्थेस्यातामितिनभ्रांतिबाधव्यवहारः क्वापीतिप्रस
ज्जेत। तस्माद्विशेषेषुव्यभिचरत्सुयादिदमितिसर्वाव्यभिचार
तयासर्वत्रावभासते । तदेवैकंसत्तस्यनक्वापिनकदापिव्यभि
चारइतितत्सत्यम् । विषयास्तुव्यभिचरंतोमिथ्येतिसिद्धम्।
तत्सत्यंतद्ब्रह्मतत्परंसआत्मेतिश्रुतेः। तस्यदेमितिपराग्रूपेणो
ल्लेखस्तुपरागध्यस्तविषयो परागनिबंधनो विभ्रमोहंकारादि
देहांतेष्वहमिति प्रत्ययोपिप्रत्यक्त्वाध्यासापेक्ष्यइति सर्वम
नवद्यम्। एवंघटःस्फुरतिपटः स्फुरतिघटइष्टःपटइष्टः इत्यत्रा
पिघटपटादीनांमिथोव्यभिचारोपिस्फुरत्वस्येष्टस्य च स्वतो
विशेषानिरूपणद्व्यभिचरत्सुविशेषेष्वव्यभिचरतोः स्फु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रत्वेष्टत्वयोः सर्वानुस्यूतसन्मात्रस्वभावाव्यभिचारा
त्ताब्रह्मात्मरूपता । अतएवश्रुतिः ज्ञानंब्रह्मआनंदोब्रह्मविद्व
नमानंदंब्रह्मेति । एतेनानंदमपिब्रह्मणोदेशकालवस्तुपरिच्छे
दराहित्यमुक्तमेवभवति देशकालयोरपिजडत्वेनपराग्वस्तु
वदध्यस्तत्वेनमिथ्यात्वादिति । तस्मान्नामरूपयोर्व्यावृ
त्तारिणोर्व्युदासेनसत्तास्फुरणानंदभागौब्रह्मात्मपदाभ्यां ल
क्षयित्वाहं ब्रह्मास्मीतिवाक्यार्थोनुसंधेयः।तत्रापिसत्तारूपेण
परागर्थव्यावृत्तं ब्रह्मतत्पदेनलक्षणीयंस्फुरणपरप्रेमास्पदत्वे
न देहाद्यहंकारप्रत्यगर्थव्यावृत्तम्आत्मात्वंपदार्थोलक्षणीयः
अनयोश्च लक्षणयापदात्स्फुरणदशायांव्यावर्त्यभेदाद्भेदे
भासमानेपि नस्वरूपभेदोस्तिस्फुरणत्वराहित्यत्वेसत्तायाः
जडत्वापत्तेः । सत्ताव्यावृत्तस्यचस्फुरणस्यासत्त्वप्रसंगात्
त्तास्फुरताविराहिणश्चानंदस्यादर्शनादसंभवाच्चेत्येवमखंड
वाक्यार्थप्रतिपत्तिसिद्धिरिति ॥ २१ ॥

एवंविज्ञातवाक्यार्थस्य दृढतरवाक्यार्थरूपाखंडब्रह्मा
त्मसाक्षात्कारोदयेसाधनविशेषमुपदिशति—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपेक्ष्यनामरूपेद्वेसच्चिदानं
दवस्तुनि ॥ समाधिसर्वदाकु
र्याद्धृदयेवाथवाबहिः॥२२॥

सपूर्वोक्तप्रकारेण वाच्यांशभूते नामरूपे द्वेअप्युपेक्षा वस्तु तयाबाधित्वासच्चिदानंदवस्तुनिलक्ष्ये खंडार्थेएकरसेसर्वदा समाधिं कुर्यात्समाधिर्नामचित्तस्याखण्डात्माद्वयब्रह्मताव न्मात्रेणास्थिरीभावःतंकुर्यादित्यर्थः । कुत्रस्थानेसमाधिःक र्त्तव्यइत्यपेक्षायांकर्तुर्बुद्धिसामर्थ्यतारतम्येन स्थानभेदमा ह हृदयेवाथवाबहिरिति ॥ २२ ॥

तत्रांतर्बहिश्चब्रह्मणिकर्त्तव्यसमाधिं द्वेधाविभज्यव्युत्पाद यतिसप्तभिःश्लोकैः। तत्रचतुर्भिर्हृदयालंबनसमाधिभेदानाह-

सविकल्पोऽविकल्पश्चसमा
धिर्द्विविधो हृदि ॥ दृश्यशब्दा
नुवेधेनसविकल्पःपुनर्द्विधा ॥२३॥

ज्ञातृज्ञानज्ञेयविकल्पानां सम्यग्विलयानेपक्षतयाऽख ण्डसच्चिदानंदात्मनिचित्तसमाधानं सविकल्पकसमाधिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उक्तविकल्पानांसम्यग्लयापेक्षयायथोक्तात्मनिचित्तसमाधानं सविकल्पोनिर्विकल्पकसमाधिरिति । हृदिद्विविधसमाधिरित्यर्थः । प्रथमंपुनर्द्वेधाविभज्यतेदृश्येति ॥ दृश्यानुवेधेनप्रकारेणशब्दानुवेधेनचप्रकारेणसविकल्पकः समाधिः पुनर्द्विधेत्यर्थः ॥ २३ ॥

तत्राद्यं व्युत्पादयति—

कामाद्याश्चेत्तसादृश्यात्तत्साक्षित्वेनचेतनाम् ॥ ध्यायेदृश्यानुविद्धोयंसमाधिःसविकल्पकः ॥ २४ ॥

कामाद्याश्चित्तस्यैववृत्तयः दृश्याश्चित्तवदाविर्भावतिरोभावधर्मकत्वात्साचित्तावस्थायामेव विभाव्यमानत्वात्सुषुप्तावभावाच्चित्तवत्सदादृश्यत्वाद्वाचित्तधर्मानात्मनो धर्मायतोऽतस्तत्साक्षित्वेनविभज्यावभासमानांचेतनां स्वप्रकाशचिदात्मस्वभावभूतांध्यायेदालोच्यतेदेकमनस्तयावस्थानं ध्यानंतत्कुर्यात् ॥ यदेवंविधंध्यानमयंदृश्यानुविद्धोनामसविकल्पकः समाधिरुत्यतइतियोजना ॥ २४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवंस्थूलसविकल्पकसमाधिमभिधाय सूक्ष्मं सविकल्पकंद्वितीयंसमाधिमाह—

असंगः सच्चिदानंदस्वप्रभोद्वैतवर्जितः ॥ अस्मीतिशब्दविद्धोयंसविकल्पःसमाहितः ॥ २५ ॥

असंगः कामादिवृत्तिमच्चित्तसंगरहितः सच्चिदानंदोनृतजडदुःखसंसर्गरहितः स्वप्रभोऽलुप्तप्रकाशस्वभावो द्वैतवर्जितोनिवृत्तसमस्तद्वैतावभासोयएवंविधः प्रत्यगात्मा सोहमस्मीतिशब्देनविद्धोयंसविकल्पः समाहितः यएवंचित्तसमाधानेनसंपादितः शब्दानुविद्धःसविकल्पकसमाधिरित्यर्थः॥

एवंयत्नतः क्रमेणसमाधिद्वयसंपत्तौ स्वयमेवभवंतंनिर्विकल्पसमाधिमुपदिशति—

स्वानुभूतिरसावेशाद्दृश्यशब्दावुपेक्ष्यतु ॥ निर्विकल्पःसमाधिः स्यान्निर्वातस्थलदीपवत् ॥ २६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वानुभूतिसच्चिदानंदानुभवः सएवरसः परमानंदः । रसोवैरसइतिश्रुतिः । तस्मिन्नावेशाच्चित्तस्यतदेकाकारता पत्तिः तस्मात्स्वानुभूतिरसावेशाद्दृश्यंकामादिवृत्तिमात्मनः शब्दोस्मीति पूर्वश्लोकेयउक्तः सतावुभौदृश्यशब्दावु पेक्ष्याभ्यांसमुद्भवंतमनादृत्य निर्वातस्थलदीपवच्चित्तस्याव स्थानंनिर्विकल्पकसमाधिः स्यादितियोजना दृश्यशब्दावु पेक्ष्यतुपुनःस्वानुभूतिरसावेशाद्यच्चित्तस्योक्तलक्षणमवस्थानं सानिर्विकल्पकसमाधिः स्यादिति वा संबंधः २६ ॥

इदानीमिदमेवसमाधित्रयंबाह्यावलंबनंव्युत्पादयति—

हृदिचबाह्यादेशेपियस्मिन्क स्मिंश्चवस्तुनि॥समाधिराद्यःस न्मात्रेनामरूपेपृथक्स्थितः॥२७॥

यस्मिन्कस्मिंश्चवस्तुनिसूर्यादौयत्सन्मात्रंसत्तामात्रम्- व्यभिचारितस्वरूपंतस्मिन्सन्मात्रेयच्चित्तसमाधानंसमाधिरा द्यादृश्यानुविद्धानामसविकल्पकइत्यर्थः । अस्यसमाधे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विशेषणंनामरूपपृथक्स्थितइतिनामरूपांशपरित्यागेनस
न्मात्रेस्थितइत्यर्थः ॥ २७ ॥

द्वितीयंशब्दानुविधंसविकल्पकसमाधिमाह--

अखंडैकरसंवस्तुसच्चिदानंदल
क्षणम्॥इत्यविच्छिन्नचित्तेऽयंस
माधिर्मध्यमो भवेत् ॥ २८ ॥

स्पष्टार्थः ॥ २८ ॥

अत्रापिनिर्विकल्पकंसमाधिमाह--

स्तव्यभावोरसास्वादात्तृतीयः
पूर्ववन्मतः ॥ एतैःसमाधिभिः
षड्भिर्नयेत्कालंनिरंतरम् ॥ २९ ॥

एतैरुक्तैः षड्भिर्बाह्यालंबनैर्हृदयाधारैश्चचित्तसमाधिभि
र्निरंतरंकालंनयेत्एतेषामन्यतमेनसमाधिनाविनाक्षणमात्र
मपिनतिष्ठेदित्यर्थः ॥ २९ ॥

उक्तायाःसमाधिकर्तव्यतायाअवधिंसूचयन्नुक्तसमाधि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पारिपाकलब्धंनित्यसमाधिमयत्नायतिमाह—

देहाभिमानेगलितेविज्ञातेपर
मात्मनि॥यत्रयत्रमनो याति
तत्रतत्र समाधयः ॥ ३० ॥

परमात्मनिसच्चिदानंदाद्वयेप्रत्यगेकरसेविज्ञातेसाक्षाद्भाव
मापन्नेसतिप्राचीनेदेहाभिमानेमनुष्योहंब्राह्मणइत्यादिदेहो
पानिबंधाभिमाने गलितेऽहेरिव परित्यक्तस्वनिर्मोकाय गतेस
तियत्रयत्रचक्षुरादिप्रचारभूमौमनोयातिस्वभावतः प्रवर्तते
तत्रतत्रसर्वत्रसमाधयः पूर्वोक्ताएवनामरूपविकारादननुबंधि
नः सच्चिदानंदवस्तुमात्राकारचित्तवृत्तिरूपा निरंतरं भवंती
त्यर्थः ॥ ३० ॥

एवंसाक्षात्काररूपेसमाधौसतियद्भवतितन्मुंडकवाक्येना
विष्करोति—

भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसं
शयाः ॥ क्षीयंतेचास्यकर्माणि
तस्मिन्दृष्टेपरावरे ॥ ३१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हृदयग्रंथिरहंकाराख्योभिद्यतेविदीर्य्यते । तस्मिन्भग्नेतन्मूलास्तदाश्रिताः सर्वेसंशयाआत्मविषयाःछिद्यंतेनश्यंतेसकृन्नष्टानामन्येषांपुनःकर्मवशात्प्रादुर्भावोभविष्यतीतिनाशंकाकार्येत्याह । क्षीयंतइति । अस्यविदुषःकर्माणिपुण्यपापलक्षणानिसंचितानिसर्वाणिक्षीयंतेफलपर्यंतस्वकार्यमनुत्पाद्यैवनश्यंतीत्यर्थः ज्ञानावस्थायांप्रमादकृतान्यपितानिनसंश्लिष्यंतइतिचकारेणसमुच्चीयते । प्रारब्धफलानांतुकर्मणांभोगादेवनाशइतिद्रष्टव्यम् । एतत्सर्वंकदाभवतीत्यपेक्षायामाह । तस्मिन्निति । तस्मिन्परावरेपरंब्रह्मादिअवरंमनुष्यादिपरंचावरंचपरावरंसर्वात्मकंब्रह्मतस्मिन्ब्रह्मणिदृष्टेसाक्षात्कृतेप्रपंचविलायनेनप्रत्यगेकरसतयोपलब्धेसतीत्यर्थः ॥ ३१ ॥

तदेवमादितआरभ्यतत्त्वंपदार्थशोधनपूर्वकंमहावाक्यार्थतत्त्वज्ञानसाक्षात्कारपर्यंतंसमाधानंसफलंचोपदिष्टम्॥ समाप्तः शास्त्रार्थः सर्वोपि ॥ तत्रप्रत्यग्ब्रह्मणोरेकत्ववाक्यार्थः इतियत्पुरोपदिष्टं तत्र चिदाभासस्यस्थूलसूक्ष्मोपाधिविशिष्ट

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जीवस्यप्रत्यक्त्वव्युदासायसाक्षिणःपुरतोभातिलिंगं देहे
नसंयुतम् । चितिच्छायासमावेशाज्जीवःस्याद्व्यावहारिकः
अस्यजीवत्वमारोपात्साक्षिण्यपिभासतइतियोविशेषः
चितस्तमिदानींप्रपंचयितुंजीवाख्यप्रकरणमिदमारभ्यते—

अवच्छिन्नश्चिदाभासस्तृतीयः
स्वप्नकल्पितः ॥ विज्ञेयस्त्रिविधो
जीवस्तत्राद्यःपारमार्थिकः ॥ ३२ ॥

अवच्छिन्नोघटाकाशादिवत्प्राणादिसंघातावच्छिन्नश्चिदात्म
प्रत्यगात्मेत्येका विधा जीवस्यचिदाभासउदकइवसूर्यादे
पादौचित्प्रतिबिंबउपाधिधर्मास्कंदितोजीवइतिद्वितीयाविधा
स्वप्नकल्पितो देहोहंमनुष्योहमित्येवंस्वप्नइवस्थूलसंघाताभे
नकल्पितोजीवइतितृतीयाविधा इत्येवंजीवोहमित्येवभासम
नात्मात्रिविधोज्ञेयःतत्रतेषुमध्येआद्योअवच्छिन्नःपारमार्थि
कोजीवोविज्ञेयःइतियोजना ॥ ३२ ॥

कथमवच्छिन्नस्यपारमार्थिकत्वमित्यतआह—

अवच्छेदःकल्पितःस्यादवच्छे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घंतुवास्तवम् ॥ तस्मिञ्जीवत्वमारो पाद्ब्रह्मत्वंतुस्वभावतः ॥ ३३ ॥

निरवयवस्यमहतोभूतस्यचिद्धातोः प्राणादिभिरवच्छेद को नामस्यात्सांशस्यखलुस्तंभादेर्मूलदेशेभूविवरेणावच्छे-दोग्रेचोत्तरावच्छादनं वंशपाल्यादिनानैवमस्यावच्छेदोपिनि रंशत्वादेवनापिसर्पगिलितमंडूक इवसर्पेणप्राणादिनायमव च्छिद्यते पूर्णतयातदसंभवात् । निष्कलंनिष्क्रियंशांतंपूर्णम दःपूर्णमितिश्रुतेः । नापि हस्तीवहस्तिपकेनस्वेच्छानुविधेयत याप्राणादिनायमवच्छिद्यतेप्राणादेरेवजडस्य चिदात्मपरतंत्र तयावैपरीत्यात् । यः प्राणमंतरोयमयति यः सर्वाणि भूता न्यंतरोयमयतीतिश्रुतेः । एतेनमृदादिनेवघटादेःकारणतया प्राणादिनावच्छेद्यता चिदात्मनः प्रत्युक्ता नचेहप्रकारांतरं पारमार्थिकंसंभवतितस्माच्चिदात्मनोवच्छेदः कल्पितः स्या दितिकथंतर्ह्युपाध्यवच्छिन्नश्चिदात्मा जीवइति व्यवहाराव भासाविति चेत्उपाधेःपरिच्छिन्नाद्भिन्नाचिदात्मनः पृथग्वि विक्ततयानुपलंभादितिवदामः यथाराहुः स्वरूपेणासन्नपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चंद्रादित्यमंडलोपरागंविनानप्रत्यक्षेगविभाव्यते तथाचिदा
त्माप्यहमुपरागमंतरेणनाविशेषतः पारिस्फुरतिअतोविशेषा
कारावभासस्यपरिच्छिन्नोपाधि परतंत्रत्वादुपाध्यवच्छिन्न
चिदात्माजीवइतिव्यवहारावभासयोरुपपत्तिरितिसर्वं सम
जसमवच्छेदस्यावच्छेद्यावच्छेदकाभयनिरूपणीयस्यक
ल्पितत्वेतन्निरूपकयोरपितयोः कल्पितत्वंस्यात्ततश्च नाकि
चित्परमार्थसदस्तीतिशून्यमतापत्तिरित्यतआह । अवच्छे
द्यंतुवास्तवमिति । अयमर्थःअवच्छेदकस्यप्राणाद्युपाधेरवा
स्तवत्वात्तत्कृतावच्छेदोप्यवास्तवः स्यान्नत्ववच्छेद्यंचि
दात्मतत्त्वमपिनहिचरणाभरणेसर्पारोपितेहि कृतचरणवेष्टन
स्यावास्तवत्वेपिचरणंतेनवेष्टमानमवास्तवंभवति तदेतदाहा
वच्छेद्यंतुवास्तवंपरमार्थमेवेत्यर्थः । अतइदं सिद्धमित्युपसंह
रति।तस्मिन्निति।तस्मिन्नुवास्तवेचिदात्मनिजीवत्वं संसारि
त्वमारोपात् परिच्छेदकोपाध्यविवेकोत्थभ्रममात्रप्रामाणिकं
जीवत्वंतस्येत्यर्थः ॥ स्वभावतस्तुब्रह्मणत्वंपूर्णत्वमेवनपरि
च्छिन्नत्वंजीवत्वमेवेत्यर्थः ॥ ३३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सतत्राद्यःपारमार्थिकइत्यस्मिन्नुक्तविशेषप्रयोजनमाह—

अवच्छिन्नस्यजीवस्यतादात्म्यं ब्रह्मणासह॥तत्त्वमस्यादिवाक्या निजगुर्नेतरजीवयोः ॥ ३४ ॥

तत्त्वमस्यादिवाक्यानितत्त्वमस्यादिभिः पदैरुपाध्यव च्छिन्नं जीवमनूद्य तस्यावच्छेद्यस्यावच्छेदावच्छेदकविशे षणांशव्युदासेन लक्षणयातत्पदलक्ष्येणब्रह्मणा सह तादा त्म्यंब्रह्मैकस्वभावंजगुः कथयंतीत्यर्थः न पुनरितरजीव योश्चिदाभासस्वप्नकल्पितयोर्ब्रह्मतादात्म्यंजगुस्तयोः स्वरू पत एव कल्पितत्वे मिथ्यात्वादित्यर्थः ॥ ३४ ॥

कथंतयोर्मिथ्यात्वमित्यपेक्षायांतदुपपादयति--

ब्रह्मण्यवस्थितामाया विक्षेपावृ तिरूपका।आवृत्याखंडतातस्मि न्जगज्जीवौप्रकल्पयेत् ॥३५॥

विक्षेपावरणाभ्यांनिरूप्यमाणाचिदात्म्येब्रह्मण्यवस्थि तामायातस्मिन्ब्रह्मणि स्वाभावकीमखंडतामावृत्याच्छाद्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जगज्जीवौप्रकल्पयेत् भोक्ताभोग्यंचेति विभागमनेकवि-
कल्पयेदित्यर्थः ॥ ३५ ॥

तत्रकोजीवः किंवाजगदित्यपेक्षायामाह-

जीवोधीस्थश्चिदाभासोजगत्स्या
द्भूतभौतिकम्॥अनादिकालमा
रभ्य मोक्षात्पूर्वमिदं द्वयम् ॥ ३६ ॥

अविद्ययाकल्पितोजीवोधीस्थोबुद्धौप्रतिबिंबतश्चिदाभा-
श्चैतन्याभासोभवतियद्यपिबिंबप्रतिबिंबयोर्न भेदोस्ति वस्तु-
तस्तथाप्युपाधिस्थानावैशिष्ट्येनप्रतिबिंबस्यासत्त्वेआभास-
श्चनबिंबधर्मोनाप्युपाधिधर्मोनाप्युभयधर्मोनापिस्वतंत्र इत्य-
न्यत्रप्रतिपादितम् । आभासात्मजीवोविद्याकाल्पितइत्यर्थः
इदानींजगदाह । जगदिति । भूतमाकाशादिभौतिकंचरा-
रदेवतिर्यङ्मनुष्यलक्षणं भवति स्याच्छब्दोभवतीत्यस्मि-
र्थेभूतभौतिकलक्षणंजगद्भोग्यं धीस्थचिदाभासोभोक्तेत्यु-
यमपि चिदात्मन्यखंडेब्रह्मण्यविद्याविजृंभितमित्युक्तंभ-
ति । नन्वनयोरविद्याकल्पितत्वेशुक्तिरजतादिवद्बाधः कद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चिदुपलभ्येतसनोपलभ्यतेतस्मान्नाविद्यामयत्वमित्यतआह । अनादीति ।जीवश्चजगच्चेतीदंद्वयमनादिकालमारभ्यामोक्षाद विद्यानिवृत्तिरूपात्पूर्वमनुवर्ततेतथाचयावदधिष्ठानसाक्षात्कारोनोदेतितावत्स्वप्नइवाप्रबोधोदयंनबाध्यतइत्यर्थः ॥ ३६ ॥

ननुयदिदंद्वयमनादि अनंतं चामोक्षात्तर्हिकथं सृष्टिप्रलयश्रुतिस्मृतिवादःकथंचसुषुप्तिजागरावित्यतआह—

चिदाभासेस्थितानिद्रा विक्षेपावृतिरूपिणी ॥ आवृत्यजीवजगतीपूर्वं नूत्नेनकल्पयेत् ॥३७॥

चिदाभासेजीवस्थितानिद्राअविद्याकिंलक्षणाविक्षेपावृतिरूपिणीप्रागुक्तलक्षणासाजीवजगतीपूर्वं प्रथमं सुषुप्तिप्रलययोरावृत्य प्रविलाप्यस्वात्मसात्कृत्वापुनःप्रबोधसृष्टौ नूत्नेननूतनरूपेणकल्पयेत्पुनर्जीवजगद्व्यवहारंप्रवर्तयेदित्यक्षरयोजना अविद्याकल्पितस्यचिदाभासस्याविद्याश्रयत्वायोगादहमज्ञइत्यविद्यातस्मिन्नूस्फुटतरावभासमपेक्ष्याचिदाभासे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थितानिद्रेत्युक्तमिति द्रष्टव्यम् यद्वापूर्वश्लोकेचिदाभासोजी
वस्तद्भोग्यं चभूतभौतिकरूपं जगद्व्यावहारिकमुभयं
चिदानंदब्रह्मचैतन्यस्थानाद्यविद्याविक्षिप्तमामोक्षं दंडा
मानमुदितम्। अस्मिंस्तुश्लोकेचिदाभासेस्थितानिद्रेतिआव
णप्रधानाप्रत्यगविद्योच्यते तयास्वप्नकल्पितोजीवस्तद्भोग्यं
जगत्प्रातिभासिकमुभयंप्रतिपादितमितितात्पर्यार्थोद्रष्टव्यः ।
व्याख्यातम् ॥ ३७॥

एतयोःकथंप्रातिभासिकत्वमित्यपेक्षायामाह—

प्रतीतिकालएवैते स्थितत्वात्प्राति भासिके ॥ नहिस्वप्नप्रबुद्धस्यपु नःस्वप्ने स्थितिस्तयोः ॥ ३८ ॥

एतेअनंतरोक्तेजीवजगतीप्रतीतिकालएवप्रतिभाससम
यएवनपुनरस्तान्नपश्चात्स्थितत्वात्प्रातिभासिके उच्येते इ
त्यर्थः । उक्तंप्रतीतिकालमात्रभासत्वमनुभवोक्त्यद्रढयाति।
नहीतिस्वप्नात्प्रबुद्धस्यावस्थांतरं गतस्य पुंसः पूर्वदृष्टयोस्त
योः पुनः स्वप्ननिवृत्त्युत्तरकालमपि । नहि स्वप्नेस्थिति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तितथादर्शनादेवेत्यर्थः । स्वप्नदृष्टस्यावस्थांतरेस्वप्नांतरेवा संवादाभावात्प्रातिभासकालमात्रतयासिद्धं प्रातिभासकत्व मितिभावः ॥ ३८ ॥

तदेवंजीवत्रयं विभज्यतत्राचिदाभासस्वप्नप्रकल्पितयो र्जीवयोः सभोग्ययोरुत्पत्तिकारणमनाद्यज्ञानगतकार्यकर णावस्थाद्वयंप्रदर्श्येदानीं त्रयाणांजीवानांमिथोभेदमनुभवा वष्टंभेनोपपादयति त्रिभिः—

प्रातिभासिकजीवस्तु जगत्तत्प्रा तिभासिकम् । वास्तवं मन्यतेय स्तुमिथ्येतिव्यवहारकः ॥३९॥

प्रातिभासिकजीवस्तुयः सतुजगत्स्वप्नकल्पितं शुक्तिरज तादिकं च प्रातिभासिकंजगद्वास्तवंमन्यतेपरमार्थमेतदित्यव गच्छतीतियोजनात्ययस्तुपुनः प्रागुक्तजगत्मिथ्येति मन्य तेसव्यावहारिकोजीवइतियोजना ॥ ३९ ॥

एवंप्रातिभासिकजीवाद्व्यावहारिकस्यभेदमुक्त्वातस्मा त्पारमार्थिकस्यजीवस्यभेदमाह—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यावहारिकजीवस्तु जगत्तद्व्यावहारिकम् ॥ सत्यंप्रत्येतिमिथ्येतिमन्यते पारमार्थिकः ॥ ४० ॥

यस्तत्व्यावहारिकंजाग्रद्दशापन्नमविसंवादित्वेनाभिमतंजगत्सत्यमवितथंकालत्रयाबाध्यमितिप्रत्येति प्रतिपद्यतेसतुव्यावहारिकजीवइतियोजनायस्त्वेतत्जगत्मिथ्येतिमन्यतेसपारमार्थिकोजीवइत्यर्थः ॥ ४० ॥

इदानींपारमार्थिकस्यजीवस्यपूर्वस्माद्भेदमाचक्षाणस्तस्याद्वयब्रह्मैक्ययोग्यतांसूचयति—

पारमार्थिकजीवस्तुब्रह्मैकंपारमार्थिकम्॥प्रत्येतिवीक्षतेनान्यद्वीक्षेतत्वनृतात्मना ॥ ४१ ॥

यस्तुब्रह्मैवैकंपारमार्थिकमितिप्रत्येति ब्रह्मणोन्यदप्यस्तीतिनवीक्षतेसतुपारमार्थिकजीवइतियोजना । यदिकदाचिद्वीक्षेतजगत्परिच्छिन्नाकारं तदाप्यनृतात्मनाबाधितत्वेनैवेक्षेतनपूर्वयोरिवस्वविषयंपारमार्थमीक्षेतइत्यर्थः । अयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावः । यावदुपदेशतः शास्त्रतोवानुमानतोवाद्रष्टृदृश्ययोर्विवे
कज्ञानंनलभतेतावत्संघातमेवद्रष्टारंतद्दृश्यंचविषयं पारमा
र्थमन्यतेलोकः सएवंमन्यमानोविवेकज्ञानवद्भिः प्रातिभा
सिकजीवइत्युच्यते।यस्तुपुनरुपदेशादिनासंघातादन्यो द्रष्टा
तद्दृश्यंचविषयंनपरमार्थं किंतुतदनुगते कारणात्मन्याविर्भा
वतिरोभावाभ्यां विक्रियते तच्चाविसंवादात्परमार्थइति मन्य
तेसव्यावहारिकोजीवइतिपरमार्थदर्शिभिरुच्यते । यस्तुपुनः
सम्यक्शास्त्रार्थमनुभवपर्यंतमवधार्य न कार्यकारणभावःपार
मार्थिकः किंतुव्योम्नीवतलमलिनत्वादिपूर्णब्रह्मणि प्रत्यक्ष
त्वेभ्रांतत्वेभ्रांत्यवभासएवेतिमन्यते सपारमार्थिको जीवइ
तिशास्त्रार्थतत्त्वविद्भिरुच्यतेइति ॥ ४१ ॥

ननु व्यावहारिकप्रातिभासिकयोर्जीवयोश्चिदविद्याक
ल्पितत्वेजडत्वात्कथंजीवत्वंजीवोहिचिदात्माप्रसिद्धोनेन
जीवेनात्मनानुप्रविशेतिश्रुतेरित्याशंक्यदृष्टांतेनानिराकर्तुं
दृष्टांतमाह--

माधुर्यद्रवशैत्यादिजलधर्मास्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रंगके॥अनुगम्याऽपितान्निष्ठफेने
प्यनुगतायथा ॥ ४२ ॥

जलस्यस्वाभाविकाधर्मास्तदवस्थाविशेषेप्यनुगता यथो
पलभ्यंतइतिदृष्टांतइत्यर्थः । साक्षिस्थाः सच्चिदानंदसंबंधा
व्यावहारिके॥तद्द्वारेणानुगच्छंतितथैवप्रातिभासिके ४२॥

साक्षिशब्देनप्रत्यगभिन्नंब्रह्मविवर्त्यतेतस्यस्वभासवासभू
ताएवसच्चिदानंदास्तस्यधर्मत्वेनकल्पयित्वा व्यपदिश्यंते सा
क्षिस्थाःसच्चिदानंदाइतितेव्यावहारिकलिंगोपाधिमवष्टभ्येह
लोकपरलोकगमनाव्यवहारवत्त्वेनकल्प्यंते जीवे संबद्धाभ
तिजलस्यतरंगवत्परस्येवचिदात्मनोवस्थांतरत्वादस्य तद्
र्मानुवृत्तिर्युक्तेत्यर्थः तद्द्वारेणव्यावहारिकजीवद्वारेणप्राति
भासिकेपिजीवेनगच्छंतिसच्चिदानंदालिंगद्वारादिस्थूलोपा
धावात्मभावाइतिकृशोहमित्याद्यभिमन्यमानेपि प्रातिभा
सिकेजीवेफेनइवशैत्यादयो धर्माः सच्चिदानंदाअनुगच्छं
तीत्यर्थः एवमात्मधर्माणामध्यारोपेमुपपाद्यापवादप्रका
रमाह--

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रातिभासिकजीवस्यलयेस्यु-
व्यावहारिके ॥ तल्लयेसच्चिदानं
दाःपर्यवस्यंतिसाक्षिणि ॥ ४३ ॥

सुषुप्तिमोक्षयोः क्रमेण लीयमानप्रातिभासिकव्यावहारिकजीवगताः सच्चिदानंदाः साक्षिशब्दनिर्दिष्टप्रत्यग्ब्रह्मणिपर्यवस्यंतिशैत्यादयइवफेनतरंगगतास्तयोर्लयेसमुद्रेनान्यत्रतेसंतीत्यर्थ इति ॥ ४३ ॥

॥ इतिवाक्यसुधासमाप्ता ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri